श्री रामनाथ स्तोत्रं (लक्ष्मणकृतं)

लक्ष्मण उवाच ।
नमस्ते रामनाथाय त्रिपुरघ्नाय शंभवे ।
पार्वतीजीवितेशाय गणेशस्कंदसूनवे ॥13॥

नमस्ते सूर्यचद्राग्निलोचनाय कपर्दिने ।
नमः शिवाय सोमाय मार्कंडेयभयच्छिदे ॥14॥

नमः सर्वप्रपंचस्य सृष्टिस्थित्यंतहेतवे ।
नम उग्राय भीमाय महादेवाय साक्षिणे ॥15॥

सर्वज्ञाय वरेण्याय वरदाय वराय ते ।
श्रीकंठाय नमस्तुभ्यं पंचपातकभेदिने ॥16॥

नमस्तेऽस्तु परानंदसत्यविज्ञानरूपिणे ।
नमस्ते भवरोगघ्न स्नायूनां पतये नमः ॥17॥

पतये तस्कराणां ते वनानां पतये नमः ।
गणानां पतये तुभ्यं विश्वरूपाय साक्षिणे ॥18॥

कर्मणा प्रेरितः शंभो जनिष्ये यत्र यत्र तु ।
तत्र तत्र पदद्वंद्वे भवतो भक्तिरस्तु मे ॥19॥

असन्मार्गे रतिर्मा भूद्भवतः कृपया मम ।
वैदिकाचारमार्गे च रतिः स्याद्भवते नमः ॥1।49।20॥

इति श्रीस्कंदपुराणे ब्रह्मखंडे सेतुखंडे एकोनपंचाशत्तमाध्यायांतर्गतं
लक्ष्मणकृतं रामनाथस्तोत्रं समाप्तं ।